
# 2.4.5 QLM Supporting Documents

1.1



## वाक्यार्थपरिषद्




वाक्यार्थपरिषदः उद्घाटनम्

प्रतिवर्षं श्रीसोमनाथसंस्कृतविश्वविद्यालये अध्यापकानां सततम् अध्ययनशीलतार्थं छात्राणां च शास्त्रार्थकौशल्यविकासाय वाक्यार्थपरिषदः आयोजनं क्रियते। अस्य शैक्षणिकसत्रस्य वाक्यार्थपरिषदः उद्घाटनं प्रथमाधिवेशनं च ०५/१०/२०२० तमे दिनाङ्के सायं ०४ वादने आयोजितम्। अस्य कार्यक्रमस्य आरम्भे गृहपतिः श्रीभाविनः पण्ड्या मङ्गलाचरणम् अकरोत्। ततः परं वाक्यार्थपरिषदः अस्य वर्षस्य संयोजकः डॉ. डी.एम.मोकरीया महोदयः कार्यक्रमस्य प्रास्ताविकं स्वागतप्रवचनं च अकरोत्। अस्य कार्यक्रमस्य आयोजकौ वर्तेते डॉ. ललितकुमारः पटेलः तथा डॉ. नरेन्द्रकुमारः पण्ड्या। क्रमेण एताभ्यां कार्यक्रमस्य अस्य प्रासङ्गिकम् उद्बोधनम् अक्रियत। ततः परं वक्तृरूपेण प्रो. देवेन्द्रनाथपाण्डेयः "विधिवाक्यानां मनोवैज्ञानिकी भूमिका" इति विषयमधिकृत्य व्याख्यानम् अकरोत्। अस्य उद्घाटनसत्रस्य अध्यक्षः माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः आध्यक्षीयप्रवचनेन सह "कृपानाम् आयामाः" इति विषये व्याख्यानम् अकरोत्। अन्ते अध्यापिका विदुषी बोल्ला धन्यवादज्ञापनम् अकरोत्। अस्मिन् उद्घाटनसत्रसमन्विते प्रथमाधिवेशने विश्वविद्यालयस्य सर्वेऽपि प्राध्यापकाः उपस्थिताः आसन्।

२०/१०/२०२० तमे दिनाङ्के वाक्यार्थपरिषदः द्वितीयम् अधिवेशनम् आयोजितम्। अस्मिन् सत्रे सर्वादौ श्रीभाविनः पण्ड्या मङ्गलाचरणम् अकरोत्। ततः अध्यापिका विदुषी बोल्ला स्वागतप्रवचनं कृतवती। अस्मिन् द्वितीये अधिवेशने डॉ. पङ्कजः रावलः "मतशतयाः विशिष्टम् अध्ययनम्", डॉ. रमेशचन्द्रः शुक्लः "ज्योतिषशास्त्रे मूल्यशिक्षणम्", श्रीभीखाभाई सोलंकी "नरसिंहनी काव्यप्रतिभा" इति विषयेषु व्याख्यानानि प्रस्तुतवन्तः। अध्यक्षरूपेण अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमारः पटेलः "रसगङ्गाधरकाव्यलक्षणविमर्शः" इति विषयमधिकृत्य अभाषत। अन्ते अपूर्वा अग्रवालः धन्यवादज्ञापनम् अकरोत्। एवं वाक्यार्थपरिषदः द्वितीयाधिवेशनं पूर्णतामगात्।

०५/१२/२०२० तमे दिनाङ्के वाक्यार्थपरिषदः तृतीयाधिवेशनं सायं ०५वादनतः समायोजितम्। कार्यक्रमेऽस्मिन् उपस्थितानां महानुभावानां शाब्दिकस्वागतं व्याकरणविभागस्य सहायकाचार्या कु. विदुषी बोल्ला महोदयाकरोत्। सत्रेऽस्मिन् विश्वविद्यालयस्य माननीयः कुलपतिः प्रो.गोपबन्धुमिश्रमहोदयस्य विशेषोपस्थितौ साहित्यविभागस्य सहायकाचार्यः डॉ. डी. एम. मोकरियामहोदयः, दर्शनविभागस्य सहायकाचार्या डॉ. उमा महेश्वरी महोदया, सङ्गणकविषयस्य प्राध्यापकः श्री आशीषः छनेशा महोदयः तथा च विश्वविद्यालयद्वारा संचालितमहाविद्यालयस्य प्राचार्यः प्रो. नरेन्द्रकुमारः पण्ड्यावर्यः शोधपत्रमाध्यमेन स्वकीयविचारान् अनुभवान् च प्रकटितवन्तः। कार्यक्रमस्य आध्यक्ष्यमपि माननीयः प्राचार्यः प्रो. नरेन्द्रकुमारः पण्ड्यावर्यः ऊढवान्। सत्रस्य समापनं धन्यवादज्ञापनात् परं पूर्णतामलेभ अभवत्। सत्रस्य सञ्चालनं व्याकरणविभागस्य सहायकाचार्या कु. विदुषी बोल्ला महोदया अकरोत्।

१४/१२/२०२० तमे दिनाङ्के सायङ्काले सार्धचतुर्वादनतः शैक्षणिकसभाखण्डे वाक्यार्थपरिषदः चतुर्थाधिवेशनमायोजितम्। अस्याः सभायाः आध्यक्ष्यं समलङ्कृतवन्तः आसन् – वेदविभागस्य आचार्याः प्रो॰ देवेन्द्रनाथपाण्डेयवर्याः। सभायामस्यां शोधपत्रत्रयं पठितम्। तत्र प्रथमवक्तृत्वेन व्याकरणविभागस्य सहायकाचार्येण डॉ॰ दीपेशविनोदकतिरामहोदयेन 'सरलमानकसंस्कृतालेखस्य समीक्षा' इत्यमुं विषयमादाय संस्कृतभाषां व्यापकतया प्रयोक्तुम्, सरलीकर्तुं च उपायाः बोधिताः। अनन्तरं द्वितीयशोधपत्रप्रस्तोत्री आसीत् – प्रा॰ मनीषावेन कालेवर्या, अस्याः उपन्याससंरचनाविषयाः मनोवैज्ञानिकदशायाः प्रतिपादनपुरस्सरं 'सुषमा बेदी के 'मौटना' उपन्यास में नारी अस्मिता की खोज' इति विषयः उपस्थापितः। ततः अन्तिमवक्ता आसीत् – श्रीरविन्द्रकालेवर्यः, विषयश्च – 'MS Word as a Research Tool' इति। पत्रेऽस्मिन् विषयानुक्रमणिकायाः, पादटिप्पण्याः, पत्रान्तटिप्पण्याः, सन्दर्भग्रन्थसूचीनाञ्च एम्.एस्.वर्ड माध्यमेन सरलतया निर्माणं कथं कर्तव्यमिति बोधितम्।

संयुक्तांक- 25-26, जुलाई-दिसम्बर- 2020, पृष्ठ संख्या-17

1.2



अन्ते च आचार्य्यैः प्रो.देवेन्द्रनाथपाण्डेयवर्य्यैः अध्यक्षीयोद्बोधने समेषामपि शोधपत्त्राणां सारः वैशिष्ट्यञ्च प्रत्यपादि। अधिवेशनमदः ज्योतिषविभागस्य सहायिकाचार्य्या सुश्रीअपूर्वाग्रवालमहोदया समचालयत्।

२८/१२/२०२० तमे दिनाङ्के शैक्षणिकभवने सभाकक्षे वाक्यार्थपरिषदः पञ्चमाधिवेशनं सायं ०५ वादनतः समायोजितम्। कार्यक्रमे व्याकरणविभागाध्यक्षवर्याणाम् प्रो. विनोदकुमारः झा महोदयानाम् आध्यक्ष्ये शोधपत्रत्रयं पठितम्। दर्शनविभागस्य सहायकाचार्यः, डॉ. जानकीशरणाचार्यः महोदयः, साहित्यविभागस्य सहायकाचार्यः श्री जिगरभट्टः , अतिथ्यध्यापकः श्रीराजा किशोरः ओझा महोदयः शोधपत्रमाध्यमेन स्वकीयविचारान् प्रकटितवन्तः। व्याकरणविभागाध्यक्षाः प्रो. विनोदकुमारः झा महोदयाः अपि स्वकीयं शोधपत्रं पठितवन्तः। सत्रस्य समापनं धन्यवादज्ञापनात् परं पूर्णतामन्त्रेण अभवत्। सत्रस्य सञ्चालनं व्याकरणविभागस्य सहायकाचार्या कु. विदुषी बोल्ला महोदया अकरोत्।



वाक्यार्थपरिषदि उपस्थिताः अध्यापकाः

संयुक्तांक- 25-26, जुलाई-दिसम्बर- 2020, पृष्ठ संख्या-18

1.3

## वाक्यार्थपरिषद्



वाक्यार्थपरिषदि आध्यक्ष्यं कुर्वाणा प्रो. अर्चनाकुमारी दूबे



वाक्यार्थपरिषदि उपस्थिताः अध्यापकाः छात्राः च

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजितायाः वाक्यार्थपरिषदः षष्ठाधिवेनं जनवरीमासस्य २०तमे दिनाङ्के सायङ्काले सार्धचतुर्वादनतः शैक्षणिकसभाखण्डेऽभूत्। अस्याः सभायाः अध्यक्षा आसीत् साहित्यविभागस्य आचार्य्या प्रो. अर्चनाकुमारीदुबे। सभायामस्यां शोधपत्रत्रयं पठितम्। तत्र प्रथमा वक्त्री आसीत् योगविभागस्य प्राध्यापिका दृष्टिः बारैया। एतया 'आसनविचारः' इत्यमुं विषयमादाय आसनानां वैशिष्ट्यम्, तेषां प्रकाराः, एतैः रोगाणां निवारणञ्च कथमिति सम्यग्बोधितम्। अनन्तरं द्वितीयशोधपत्रप्रस्तोता आसीत्शारीरिकशिक्षणविभागस्य सहायकाचार्य्यः डॉ. जयेशमुङ्गरामहोदयः, अनेन 'રોગનું મેગાસિટી એટલે ઓબેસિટી' इति विषयमादाय शरीरस्थौल्येन के के रोगाः जायन्ते, तन्निदानञ्च उद्बोधितम्। ततः अन्तिमशोधपत्त्रमासीत् सभाध्यक्षायाः प्रो. अर्चनाकुमारीदुबेवर्य्यायाः। जीवनप्रबन्धाय उपयोगिनः गुणाः के?, ते चैकस्मिन् भगवति हनुमति रामायणादिषु कस्मिन् प्रसङ्गे द्रष्टुं शक्नुमः इत्युपदिश्य 'जीवनप्रबन्धनस्य मूर्त्तिमान् हनुमान्' इति विषयं सुष्ठु प्रतिपादितवती। अन्ते च सभाध्यक्षा अध्यक्षीयोद्बोधने द्वयोरपि शोधपत्त्रयोः वैशिष्ट्यमवोचत्। अधिवेशनेऽस्मिन् विश्वविद्यालयस्य अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमारः पटेलः, वरिष्ठाचार्यः प्रो. देवेन्द्रनाथपाण्डेयः, सर्वेऽपि आचार्य्याः, सहाचार्य्याः, सहायकाचार्य्याः, छात्त्राश्च उपस्थिताः आसन्। एषा सभा ऑनलाईनवेबैक्समाध्यमेनापि छात्त्राणां कृते आयोजिता आसीत्। अस्याः सञ्चालनं ज्योतिषविभागस्य सहायिकाचार्य्या सुश्रीअपूर्वा अग्रवाल अकरोत्।

1.4



## वाक्यार्थपरिषद: उद्घाटनसत्रस्य प्रथमाधिवेशनस्य च वृत्तकथनम्

श्रीसोमनाथसंस्कृतविश्वविद्यालये वाक्यार्थपरिषद: उद्घाटनसत्रं प्रथमाधिवेशनञ्च ०५-10-2020 तमे दिनाङ्के सोमवासरे सायं 4:00 वादनतः समायोजितम् । मंगलाचरणेन प्रारभ्यमाने कार्यक्रमेऽस्मिन् सर्वादौ महानुभावानां शाब्दिकस्वागतम् एवं कार्यक्रमस्य रूपरेखाकथनं साहित्यविभागस्य सहायकाचार्यः डॉ. डी. एम. मोकरिया महोदयोऽकरोत् । सत्रेऽस्मिन् प्रकृष्टगोचितमुद्बोधनम् अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमारपटेलमहोदयः एवं महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारपण्ड्या महोदयः कृतवन्तौ । अधिवेशनेऽस्मिन् वेदवेदाङ्गसङ्कायाध्यक्षचरः प्रो. देवेन्द्रनाथपाण्डेयवर्यः विधिवाक्यानां मनोवैज्ञानिकी भूमिका इति विषयमुपादाय शोधपत्रमाध्यमेन स्वकीयविचारान् अनुभवान् च प्रकटितवान् । कार्यक्रमस्य अध्यक्षपदं माननीयः कुलपतिवर्यः प्रो. गोपबन्धुमिश्रमहोदयेन समलङ्कृतम् । तेन अध्यक्षीयोद्बोधनेन सहैव कृत्यानाम् अयामाः इति प्रायश्चित्तविषयं स्वीकृत्य स्वकीयं शोधपत्रमपि प्रस्तुतम् । सत्रान्ते सर्वेषां महानुभावानाम् आभारभावः व्याकरणविभागस्य सहायकाचार्या सुश्रीविदुषीबोल्लामहोदया प्रकटितवती। सत्रस्य सञ्चालनं ज्योतिषविभागस्य सहायकाचार्यया सुश्रीअपूर्वाअग्रवालमहोदयया विहितम् ।

## वाक्यार्थपरिषद: द्वितीयाधिवेशनस्य वृत्तकथनम्

श्रीसोमनाथसंस्कृतविश्वविद्यालये वाक्यार्थपरिषद: द्वितीयाधिवेशनं 20-10-2020 तमे दिनाङ्के मंगलवासरे सायं 4:00 वादनतः समायोजितम् । मंगलाचरणेन प्रारभ्यमाने कार्यक्रमेऽस्मिन् सर्वादौ महानुभावानां शाब्दिकस्वागतं व्याकरणविभागस्य सहायकाचार्या कु. विदुषीबोल्ला महोदयाऽकरोत् । सत्रेऽस्मिन् पुराणविभागस्य सहायकाचार्यः डॉ. पंकजकुमाररावलमहोदयः, ज्योतिषविभागस्य सहायकाचार्यः डॉ. रमेशचन्द्रशुक्लमहोदयः, गुजराती भाषाया: अतिथ्यध्यापक: श्री भीखाभाईसोलङ्कीमहोदय: तथा च विश्वविद्यालयस्य अनुस्नातकविभागाध्यक्ष: डॉ. ललितपटेलमहोदय: शोधपत्रमाध्यमेन स्वकीयविचारान् अनुभवान् च प्रकटितवन्त: । कार्यक्रमस्य अध्यक्षपदमपि डॉ. ललितपटेलमहोदयेन समलङ्कृतम् । सत्रस्य समापनं धन्यवादज्ञापनात् परं पूर्णतामन्त्रेण अभवत् । सत्रस्य सञ्चालनं ज्योतिषविभागस्य सहायकाचार्या कु. अपूर्वा अग्रवाल: अकरोत् ।

## वाक्यार्थपरिषद: तृतीयाधिवेशनस्य वृत्तकथनम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य शैक्षणिकभवने सभाकक्षे वाक्यार्थपरिषद: तृतीयाधिवेशनं 06-12-2020 तमे दिनाङ्के शनिवासरे सायं 6:00 वादनतः समायोजितम् । कार्यक्रमेऽस्मिन् उपस्थितानां महानुभावानां शाब्दिकस्वागतं व्याकरणविभागस्य सहायकाचार्या कु. विदुषी बोल्ला महोदयाकरोत् । सत्रेऽस्मिन् विश्वविद्यालयस्य माननीयः कुलपतिः प्रो.गोपबन्धुमिश्रमहोदयस्य विशेषोपस्थितौ साहित्यविभागस्य सहायकाचार्यः डॉ. डी. एम. मोकरियामहोदयः, दर्शनविभागस्य सहायकाचार्या डॉ. उमा महेश्वरी महोदया, सङ्गणकविषयस्य प्राध्यापकः श्री आशीषः धनेशा महोदयः तथा च विश्वविद्यालयद्वारा संचालितमहाविद्यालयस्य प्राचार्यः प्रो. नरेन्द्रकुमारः पण्ड्यावर्यः शोधपत्रमाध्यमेन स्वकीयविचारान् अनुभवान् च प्रकटितवन्तः । कार्यक्रमस्य आध्यक्ष्यमपि माननीयः प्राचार्यः प्रो. नरेन्द्रकुमारः पण्ड्यावर्यः ऊढवान्। सत्रस्य समापनं धन्यवादज्ञापनात् परं पूर्णतामन्त्रेण अभवत् । सत्रस्य सञ्चालनं व्याकरणविभागस्य सहायकाचार्या कु. विदुषी बोल्ला महोदया अकरोत् ।



## वाक्यार्थपरिषद: चतुर्थाधिवेशनस्य वृत्तकथनम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन १४/१२/२०२० तमे दिनाङ्के सायङ्काले सार्धचतुर्वादनतः शैक्षणिकसभाखण्डे वाक्यार्थपरिषदः चतुर्थाधिवेशनमायोजितम्। अस्याः सभायाः आध्यक्ष्यं समलङ्कृतवन्तः आसन् – वेदविभागस्य आचार्याः प्रो॰ देवेन्द्रनाथपाण्डेयवर्याः। सभायामस्यां शोधपत्रत्रयं पठितम्। तत्र प्रथमवक्तृत्वेन व्याकरणविभागस्य सहायकाचार्येण डॉ॰ दीपेशविनोदकतिरामहोदयेन 'सरलमानकसंस्कृतलेखस्य समीक्षा' इत्यनुं विषयमादाय संस्कृतभाषां व्यापकतया प्रयोक्तुम्, सरलीकर्तुञ्च उपायाः बोधिताः। अनन्तरं द्वितीयशोधपत्रप्रस्तोत्री आसीत् – प्रा॰ मनीषाबेन कालेवर्या, अनया उपन्यासस्थनायिकायाः मनोवैज्ञानिकदशायाः प्रतिपादनपुरस्सरं 'सुषमा बेदी के 'लौटना' उपन्यास में नारी अस्मिता की खोज' इति विषयः उपस्थापितः। ततः अन्तिमवक्ता आसीत् – श्रीरविन्द्रकालेवर्य्यः, विषयश्च – 'MS Word as a Research Tool' इति। पत्रेऽस्मिन् विषयानुक्रमणिकायाः, पादटिप्पण्याः, पत्रान्तटिप्पण्याः, सन्दर्भग्रन्थसूचीनाञ्च एम्॰एस्॰वर्ड माध्यमेन सरलतया निर्माणं कथं कर्त्तव्यमिति बोधितम्। अन्ते च आचार्यैः प्रो॰देवेन्द्रनाथपाण्डेयवर्यैः अध्यक्षीयोद्बोधने सर्वेषामपि शोधपत्राणां सारः वैशिष्ट्यञ्च

1.5



## वाक्यार्थपरिषदः पञ्चमाधिवेशनस्य वृत्तकथनम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य शैक्षणिकभवने सभाकक्षे वाक्यार्थपरिषदः पञ्चमाधिवेशनं २८-१२-२०२० तमे दिनाङ्के सोमवासरे सायं ५:०० वादनतः समायोजितम्। कार्यक्रमे व्याकरणविभागाध्यक्षवर्याणाम् प्रो. विनोदकुमारः झा महोदयानाम् आध्यक्ष्ये शोधपत्रत्रयं पठितम्। दर्शनविभागस्य सहायकाचार्यः, डॉ. जानकीशरणाचार्यः महोदयः, साहित्यविभागस्य सहायकाचार्यः श्री जिगरभट्टः, अतिथ्यध्यापकः श्रीराजा किशोरः ओझामहोदयः शोधपत्रमाध्यमेन स्वकीयविचारान् प्रकटितवन्तः। व्याकरणविभागाध्यक्षाः प्रो. विनोदकुमारः झा महोदयाः अपि स्वकीयं शोधपत्रं पठितवन्तः। सत्रस्य समापनं धन्यवादज्ञापनात् परं पूर्णतामन्त्रेण अभवत्। सत्रस्य सञ्चालनं व्याकरणविभागस्य सहायकाचार्या कु. विदुषी बोल्ला महोदया अकरोत्।

## वाक्यार्थपरिषदः षष्ठाधिवेशनस्य वृत्तकथनम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजितायाः वाक्यार्थपरिषदः षष्ठाधिवेशनम् १०/१२/२०२० तमे दिनाङ्के सायङ्काले सार्धचतुर्वादनतः शैक्षणिकसभाखण्डेऽभूत्। अस्याः सभायाः अध्यक्षाः आसन् – साहित्यविभागस्य आचार्याः प्रो॰ अर्चनाकुमारीदुबेवर्याः। सभायामस्यां शोधपत्रत्रयं पठितम्। तत्र प्रथमवक्त्रासीत् - योगविभागस्य प्राध्यापिका सुश्रीदृष्टिबेन बारैयामहोदया। एतया 'आसनविचारः' इत्यमुं विषयमादाय आसनानां वैशिष्ट्यम्, तेषां प्रकारः, एतैः रोगाणां निवारणञ्च कथमिति सम्यग्बोधितम्। अनन्तरं द्वितीयशोधपत्रप्रस्तोता आसीत् – शारीरिकशिक्षणविभागस्य सहायकाचार्य्यः डॉ॰ जयेशमुकुन्दरामहोदयः, अनेन 'रोगनुं मेदस्विता अेटले ओबेसिटी' इति विषयमाश्रित्य शरीरस्थौल्येन के के रोगाः जायन्ते, तन्निदानञ्चोद्बोधितम्। ततः अन्तिमशोधपत्रमासीत् सभाध्यक्षाणां प्रो॰ अर्चनाकुमारीदुबेवर्य्याणाम्। जीवनप्रबन्धाय उपयोगिनः गुणाः के, ते चैकस्मिन् भगवति हनुमति रामायणादिषु कस्मिन् प्रसङ्गे द्रष्टुं शक्नुमः इत्युपदिश्य 'जीवनप्रबन्धनस्य मूर्त्तिमान् हनुमान्' इति विषयं सुष्ठु प्रतिपादितवत्यः। अन्ते च सभाध्यक्षाः आध्यक्षीयोद्बोधने द्वयोरपि शोधपत्रयोः वैशिष्ट्यमबोधयन्। अधिवेशनेऽस्मिन् विश्वविद्यालयस्य अनुस्नातकविभागाध्यक्षाः डॉ॰ ललितपटेलवर्य्याः, वरिष्ठाचार्य्याः प्रो॰ देवेन्द्रनाथपाण्डेयमहाभागाः, सर्वेऽपि आचार्य्याः, सहाचार्य्याः, सहायकाचार्य्याः, छात्राश्चोपस्थिताः आसन्। एषा सभा ऑनलाईनवेबैक्समाध्यमेनापि छात्राणां कृते आयोजितासीत्। अस्याः सञ्चालनं ज्योतिषविभागस्य सहायिकाचार्य्या सुश्रीअपूर्वाअग्रवालमहोदया अकार्षीत्।

## वाक्यार्थपरिषदः सप्तमाधिवेशनस्य वृत्तकथनम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन 16/04/2021 तमे दिनाङ्के सायङ्काले सार्धचतुर्वादनतः अन्तर्जालमाध्यमेन वाक्यार्थपरिषदः सप्तमाधिवेशनमायोजितम्। अस्यां सभायां साहित्यविभागस्य आचार्याः प्रो. महेन्द्रकुमार दवेवर्याः आध्यक्ष्यम् ऊढवन्तः। सभायामस्यां शोधपत्रत्रयं पठितम्। तत्र प्रथमवक्तृत्वेन वेदविभागस्य सहायकाचार्य्येण श्री विपुलजादवमहोदयेन 'शुक्लयजुर्वेदे पृथिवीतत्त्वम्' इत्ययं विषयः बोधितः। अनन्तरं द्वितीयशोधपत्रवक्तृत्वेन आसीत् ज्योतिषविभागस्य सहायकाचार्यः श्री नित्यानन्द ओझा महोदयः, अनेन 'ज्योतिषशास्त्रस्यालोके यात्राविचारः' इति विषयः उपस्थापितः। ततः तृतीयवक्तृत्वेन उपस्थितः संशोधनाधिकारी डॉ. कार्तिक पंड्यावर्यः 'CAS Promotions as per the UGC Regulations 2018' इति विषयमुपादाय स्वीयं शोधपत्रं पठितवान्। अन्ते च आचार्यैः प्रो. महेन्द्रकुमार दवेवर्यैः 'महाकविश्रीरामचन्द्रसूरिरचितनलविलासे रसविमर्शः' इत्यमुं विषयं प्रतिपाद्य आध्यक्षीयोद्बोधनं विहितम्। अस्य अधिवेशनस्य सञ्चालनं व्याकरणविभागस्य सहायिकाचार्यया सुश्री विदुषीबोल्लामहोदयया विहितम्।

## वाक्यार्थपरिषदः अष्टमाधिवेशनस्य इतिवृत्तम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन ०५/०५/२०२१ तमे दिनाङ्के सायङ्काले सार्धचतुर्वादनतः अन्तर्जालमाध्यमेन वाक्यार्थपरिषदः अष्टमाधिवेशनम् माननीयानां कुलपतिपादानां प्रो. गोपबन्धु मिश्रमहाभागानां विशेषोपस्थितौ आयोजितम्। अस्यां सभायां वेदवेदाङ्गसङ्कायस्य अध्यक्षाः डॉ. अमृत पाणिग्राहीवर्याः आध्यक्ष्यम् ऊढवन्तः। सभायामस्यां शोधपत्रत्रयं पठितम्। तत्र प्रथमवक्त्रीत्वेन पुराणसङ्कायस्य अध्यक्षा डॉ. आशा नायक महोदयया 'श्रीमद्भागवतपुराणे ध्रुवोपाख्यानस्य आधुनिकयुगे अध्ययनम्' इत्ययं विषयः बोधितः। अनन्तरं द्वितीयशोधपत्रवक्त्रीत्वेन आसीत् ज्योतिषविभागस्य सहायकाचार्या सुश्री अपूर्वा अग्रवाल महोदया, अनया 'लग्नभावफलविचारः' इति विषयः उपस्थापितः। ततः तृतीयवक्त्रीत्वेन उपस्थिता व्याकरणविभागस्य सहायकाचार्या सुश्री विदुषी बोल्ला महोदया 'वर्णत्वपरिष्कारः' इति विषयमुपादाय स्वीयं शोधपत्रं पठितवती। अन्ते च वेदवेदाङ्गसङ्कायस्य अध्यक्षवर्यैः डॉ. अमृत पाणिग्राहीमहोदयैः 'वैदिकसाहित्ये इन्द्रविज्ञानम्' इत्यमुं विषयं प्रतिपाद्य अध्यक्षीयोद्बोधनं विहितम्। अस्य अधिवेशनस्य सञ्चालनं साहित्यविभागस्य सहायकाचार्यैः डॉ. डी. एम. चोकरियावर्यैः विहितम्।

2.1



## महामहोपाध्याय-के.का.शास्त्रि-व्याख्यानमाला

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन जनवरीमासस्य एकादशे दिनाङ्के सायंकाले श्री के. का.शास्त्रि-पाक्षिक-व्याख्यानमालायाः सप्तमं व्याख्यानम् आयोजितम्। अस्मिन् व्याख्याने मुख्यवक्तृरूपेण सौभाग्येन प्राप्तः "पद्मश्रीः"प्रो. राजेन्द्रमिश्रः "अभिराजः"। एषः मान्यवरः सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य कुलपतिचरः वर्तते। अस्य कार्यक्रमस्य अध्यक्षः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः आसीत्।




के.का.शास्त्रि-पाक्षिकव्याख्यानमालायाः सप्तमे व्याख्याने मुख्यः वक्ता पद्मश्रीः राजेन्द्रमिश्रवर्यः माननीयः कुलपतिवर्यः च

कार्यक्रमस्य आरम्भे अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः महानुभावानां परिचयपूर्वकं शाब्दिकं स्वागतम् अकरोत्। ततः श्रीके. का. शास्त्रि-पाक्षिक-व्याख्यानमालायाः सप्तमस्य व्याख्यानस्य मुख्यवक्ता प्रो. राजेन्द्रमिश्रः "भारतीय संस्कृति की वैश्विकता" इति विषयमादाय विद्वत्तापूर्णं व्याख्यानम् अकरोत्। मुख्यवक्तुः व्याख्यानानन्तरम् अध्यक्षः प्रो.गोपबन्धुमिश्रमहोदयः आध्यक्षीयम् उद्बोधनम् अकरोत्। कार्यक्रमस्य अन्ते प्रो. देवेन्द्रनाथ-पाण्डेयः कार्यक्रमे उपस्थितानां महानुभावानां धन्यवादज्ञापनम् अकरोत्। अस्मिन् कार्यक्रमे विश्वविद्यालयस्य कुलसचिवः, महाविद्यालयस्य प्राचार्यः, सर्वेऽपि अध्यापकाः छात्राः च वेबेक्स माध्यमेन उपस्थिताः आसन्। फेसबुक लाइवमाध्यमेन अनेके श्रोतारः अनेन व्याख्यानेन लाभान्विताः अभवन्। अस्य व्याख्यानसत्रस्य सञ्चालनं वेदवेदाङ्गसङ्कायस्य अध्यक्षः डॉ. शत्रुघ्नः पाणिग्राही अकरोत्।



अष्टमे व्याख्याने मुख्यः वक्ता प्रो. भागीरथी नन्दः


मार्चमासस्य २४ तमे दिनाङ्के अस्याः व्याख्यानमालायाः अष्टमं व्याख्यानम् आयोजितम्। अस्मिन् व्याख्यानसत्रे आदौ डॉ. जानकीशरणः आचार्यः महानुभावानां परिचयपूर्वकं स्वागतम् अकरोत्। ततश्च मुख्यवक्ता लालबहादुरशास्त्रि-केन्द्रिय-संस्कृत-विश्वविद्यालयस्य प्राध्यापकः प्रो. भागीरथी नन्दः "कालिदास साहित्य में अखण्ड भारत की परिकल्पना" इति विषयमादाय रसप्रदं व्याख्यानम् अकरोत्। अस्मिन् अष्टमे व्याख्यानसत्रे माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रमहोदयः आध्यक्षीयम् उद्बोधनम् अकरोत्। अष्टमस्य व्याख्यानसत्रस्य सञ्चालनं डॉ. पङ्कजकुमारः रावलः अकरोत्। एतस्मिन् व्याख्याने अपि सर्वेऽपि अध्यापकाः छात्राः च उपस्थिताः आसन्। इदञ्च व्याख्यानं फेसबुक माध्यमेन प्रसारितम्।

2.2



## श्री के. का. शास्त्रि-पाक्षिकव्याख्यानमाला

श्रीसोमनाथसंस्कृतविश्वविद्यालयः कोरोनाकाले विविधान् कार्यक्रमान् ओनलाइनमाध्यमेन आयोजयन् वर्तते। एतेषु कार्यक्रमेषु कश्चन् विशिष्टः कार्यक्रमः अस्ति श्री के.का.शास्त्रि-पाक्षिक-व्याख्यानमाला। एतस्याः व्याख्यानमालायाः उद्घाटनम् ०८/०८/२०२० तमे दिनाङ्के माननीयस्य कुलपतेः प्रो. गोपबन्धुमिश्रवर्यस्य अध्यक्षतायां सम्पन्नम्। उद्घाटनसत्रे विशिष्टातिथिरूपेण "युनाइटेड् नेशन एसोसिएसन" इत्यस्य अध्यक्षः श्रीमान् भरतभाई पण्ड्या उपस्थितः आसीत्। भारतसर्वकारस्य निर्वाचनायुक्तचरः श्रीमान् एन. गोपालस्वामी महोदयः मुख्यातिथिरूपेण उपस्थितः आसीत्। मुख्यवक्तृरूपेण इन्दीरागान्धि-राष्ट्रिय-कलाकेन्द्रस्य सदस्यसचिवः डॉ. सच्चिदानन्दः जोषी महाभागः उपस्थाय "भारतीय संस्कृति में संवादधर्म" इति विषये सारपूर्णं व्याख्यानम् अकरोत्। उद्घाटनसत्रस्य अध्यक्षः मान्यः कुलपतिः प्रो. गोपबन्धुमिश्रः आध्यक्षीयप्रवचनम् अकरोत्। धन्यवादज्ञापनेन पूर्णतामन्त्रेण च प्रथमं व्याख्यानम् उद्घाटनसत्रं च समाप्तिमगात्।






के.का.शास्त्रि-व्याख्यानमालायां भाषमाणः
श्री एन. गोपालस्वामी महोदयः

एतस्यामेव व्याख्यानमालायां द्वितीयं व्याख्यानम् २१/०८/२०२० तमे दिनाङ्के सायं ०५ वादने आयोजितम्। अत्र मुख्यवक्तृरूपेण गुजरातसाहित्याकादम्याः अध्यक्षः डॉ. विष्णुपण्ड्यामहोदयः उपस्थाय "आधुनिक परिप्रेक्ष्य में संस्कृत" इति विषये व्याख्यानम् अकरोत्। ०५/०९/२०२० तमे दिनाङ्के आयोजिते तृतीयव्याख्याने गुजरातविश्वविद्यालयस्य कुलपतिचरः प्रो.नरेश-वेद-महोदयः "उपनिषत् अमृत के आम्रवृक्ष" इति विषये व्याख्यानम् अकरोत्। १४/१०/२०२० तमे दिनाङ्के आयोजिते चतुर्थे व्याख्याने परमपूज्यः भद्रेशदासस्वामी "श्रीमद्भगवद्गीता में स्थितप्रज्ञता" इति विषये व्याख्यानम् अकरोत्। ०४/१२/२०२० तमे दिनाङ्के आयोजिते पञ्चमे व्याख्याने प्रो. मिथिलाप्रसाद-त्रिपाठिवर्यः "श्रीमद्भागवत पुराण में लोकचिन्तन" इतिविषये व्याख्यानम् अकरोत्। १७/१२/२०२० तमे दिनाङ्के आयोजिते षष्ठे व्याख्याने हरिसिंह गौर विश्वविद्यालयस्य माननीयः कुलाधिपतिः प्रो. बलवन्तः जानी महोदयः "श्रीके.का.शास्त्रिणः संशोधनकार्यम्" इति विषये व्याख्यानम् अकरोत्।

2.3

सर्वेषां व्याख्यानानाम् आयोजनम् निरन्तरं नित्यतया भवति। प्रतिव्याख्यानम् ओनलाइन फेसबूक उपरि जीवन्तप्रसारणेन प्रसारितं भवति अतः सामाजिकाः अपि अस्याः व्याख्यानमालायाः लाभं लभन्ते। अस्याः व्याख्यानमालायाः आयोजकरूपेण अनुस्मातकविभागाध्यक्षः डॉ. ललितकुमारः पटेलः तथा महाविद्यालयस्य प्राचार्य डॉ. नरेन्द्रकुमारः पण्ड्या वर्तेते। संयोजकरूपेण डॉ. शत्रुघ्नपाणिग्राही श्रीविपुलः जादवः च वर्तेते। एवम् अस्याः व्याख्यानमालायाः आयोजनं जायमानम् अस्ति।




के.का.शास्त्रि-व्याख्यानमालायां भाषमाणः
प्रो. मिथिलाप्रसाद-त्रिपाठिवर्यः



के.का.शास्त्रि-व्याख्यानमालायां भाषमाणाः
भद्रेशस्वामिनः

2.4

## स्वामिविवेकानन्दजयन्तीमुपलक्ष्य आयोजितं विशिष्टव्याख्यानम्



व्याख्याने भाषमाणः कृतार्थानन्दस्वामिवर्यः

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन जनवरीमासस्य द्वादशे दिनाङ्के सायङ्काले चतुर्वादनतः वेबैक्समाध्यमेन स्वामिविवेकानन्दजयन्तीमुपलक्ष्य विशिष्टव्याख्यानमायोजितम्। अस्य कार्य्यक्रमस्य आध्यक्ष्यं समलङ्कृतवान् विश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रमहाभागः। कार्य्यक्रमेऽस्मिन् विशिष्टव्याख्याता आसीत् परमपूज्यः कृतार्थानन्दस्वामिमहोदयः, रामकृष्णमिशन, कलकत्ता। कार्य्यक्रमस्य शुभारम्भः श्रीभाविनपण्ड्यामहोदयेन मङ्गलाचरणेन कृतः। अनन्तरमुपस्थितानां विशिष्टानाञ्च परिचयपूर्वकं स्वागतं वचसा अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमारपटेलवर्यः अकरोत्। ततः स्वामिविवेकानन्दजयन्तीमुपलक्ष्य आयोजितायाः निबन्धस्पर्धायाः पुरस्कारघोषणा साहित्यविभागस्य प्रो.अर्चनाकुमारीदुबेवर्यया कृता। पुरस्कारस्योद्घोषणायाः अनन्तरं परमपूज्यस्य कृतार्थानन्दस्वामिनः वैदुष्यपूर्ण व्याख्यानं जातम्। ततः विश्वविद्यालयस्य माननीयेन कुलपतिवर्येण प्रो. गोपबन्धुमिश्रमहोदयेन आध्यक्षीयोद्बोधनं विहितम्। अन्ते चोपस्थितानां सर्वेषां कार्त्तज्ञ्यं प्रो. अर्चनाकुमारीदुबेवर्य्या प्रकटितवती। पूर्णतामन्त्रेण कार्य्यक्रमस्य समापनमभूत्। अस्य कार्य्यक्रमस्य सञ्चालनं विद्यावारिधिच्छात्रेण श्रीदिलीपत्रिवेदिमहोदयेन अकारि। अस्मिन् कार्य्यक्रमे विश्वविद्यालयस्य सर्वे अपि आचार्याः, सहाचार्याः, सहायकाचार्याः छात्राश्चोपस्थिताः आसन्। अस्य लाईवप्रसारणमपि फेसबुकद्वारा जातम्।

2.5



## नवीना राष्ट्रिया शिक्षानीतिः संस्कृतं च



१८/०८/२०२० तमे दिनाङ्के श्री-सोमनाथ-संस्कृत-विश्वविद्यालयेन आयोजिते "नवीना राष्ट्रिया शिक्षानीतिः संस्कृतं च" इति विषये विशेषज्ञरूपेण 'पद्मश्री' सम्मानितः 'संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली' इत्यस्य न्यासी सचिवः श्री चमू कृष्णशास्त्री आसीत्। कार्यक्रमस्य अध्यक्षः अस्य विश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धु मिश्रः आसीत्। विशेषज्ञरूपेण वदन् श्री चमू कृष्णशास्त्री महोदयः नवीनायाः राष्ट्रिय-शिक्षानीतेः अनुसारं संस्कृत-विश्वविद्यालयेन विशेषतः श्री-सोमनाथ-संस्कृत-विश्वविद्यालयेन किं किं साधनीयम् इति उक्तवान्। सहैव विविधप्रश्नानाम् उत्तरं कृतवान्। अत्र संयोजकरूपेण डॉ. ललित पटेलः डॉ. नरेन्द्र कुमार पण्ड्या च आस्ताम्। अत्र अध्यक्षस्य अध्यक्षीयभाषणानन्तरं डॉ. दशरथ जादव-महोदयेन आभारप्रदर्शनं विहितम्। अत्र कार्यक्रमे चतुःपञ्चाशशत् जनाः श्रोतृरूपेण आसन्। कार्यक्रमेऽस्मिन् प्रो. विनोद कुमार झा संयोजकत्वेन कार्यसम्पादनम् अनुष्ठितम्।

संयुक्तांक- 25-26, जुलाई-दिसम्बर- 2020, पृष्ठ संख्या-14

2.6





## संस्कृतसप्ताहोत्सवः

प्रतिवर्षमिव अस्मिन् वर्षे अपि श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा संस्कृतसप्ताहमहोत्सवस्य आयोजनम् ३१ तः ०६/०७/२०२० तमेषु दिनाङ्केषु जातम्। अस्य सप्ताहोत्सवस्य उद्घाटनसत्रं ३१/०७/२०२० तमे दिनाङ्के शुक्रवासरे प्रातः सार्धदशवादने अभवत्। उद्घाटनसत्रे प्रास्ताविकवक्तव्यं महानुभावानां स्वागतं च प्राचार्यः नरेन्द्रकुमारः पण्ड्यामहोदयः अकरोत्। तत्र क्रमेण श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा प्रकाशितस्य १. भाष्यपरम्परा ज्ञानप्रवाहश्च, २. काश्मीरशैवदर्शनम् एवञ्च भवानीसिंहनामनिरूपणम् इति पुस्तकद्वयस्य लोकार्पणं महानुभावानां करकमलैः जातम्।

संस्कृतसप्ताहोत्सवस्य उद्घाटनकार्यक्रमः

संस्कृतसप्ताहोत्सवस्य उद्घाटनसत्रे पुस्तकविमोचनम्

संस्कृतसप्ताहोत्सवस्य उद्घाटनसत्रस्य Live प्रसारणम्

अस्मिन् उद्घाटनसत्रे मुख्यवक्तृरूपेण सौभाग्येन प्राप्तः संस्कृत-संवर्धन-प्रतिष्ठानस्य न्यासी पद्मश्रीः चमूकृष्णशास्त्रिवर्यः। मान्यः शास्त्रिवर्यः संस्कृत-प्रसाराय व्रती वर्तते इति विज्ञातप्रायम्। तस्य भाषणमपि सर्वथा प्रासङ्गिकम् अनुकरणीयं च भवति इत्यपि प्रसिद्धमेव। इत्थमस्मिन् अवसरेऽपि श्रीमान् शास्त्रिवर्यः संस्कृतसेवार्थं नूतनान् उपायान् प्रदर्शितवान्। संस्कृतशिक्षकाः कथं संस्कृतं प्रसारयितुं शक्ताः इति विषयेऽपि विविधान् उपायान् सः अवदत्। आधुनिकः कालः तान्त्रिकीकालः, यन्त्रकालः वर्तते, विविधानां यन्त्राणां तान्त्रिकीणां च उपयोगेन संस्कृतकार्यं कथं भवितुं शक्नोति इति शास्त्रिमहोदयेन अवादि।

कार्यक्रमे अस्मिन् श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य मान्यः कुलपतिवर्यः प्रो. गोपबन्धुमिश्रमहोदयः अध्यक्षत्वेन उपस्थाय संस्कृतसप्ताहस्य, वर्तमानसमये संस्कृतस्य च महत्त्वम् अवदत्। कार्यक्रमस्य अन्ते कुलसचिवः डॉ दशरथ जादवः सर्वेषां कृते धन्यवादज्ञापनवचांसि प्रकटितवान्।

अस्य उद्घाटनकार्यक्रमस्य संचालनं साहित्यविभागस्य सहायकाचार्येण श्रीगिरीशभट्टमहोदयेन अक्रियत। एतस्मिन् कार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य एवं विश्वविद्यालयसंलग्नमहाविद्यालयानां प्राचार्याः, प्राध्यापकाः, कर्मचारिणः, अधिकारिणः, छात्राः च ऑनलाइन वेबेक्स माध्यमेन भागं गृहीतवन्तः। एतस्य उद्घाटनकार्यक्रमस्य फेसबुक माध्यमेन लाइव प्रसारणमपि जातम्। तत्रापि प्रायः सप्तशतं जनाः अमुं कार्यक्रमं दृष्ट्वा लाभान्विताः समभवन्।

अस्मिन् सप्ताहोत्सवे विविधाः स्पर्धाः कार्यक्रमाः च आयोजिताः आसन्। स्पर्धानाम् आयोजनं विश्वविद्यालयस्य अध्यापकैः कृतमासीत्। संस्कृतप्रचाराभियानम् अपि अस्मिन् सप्ताहे आयोजितम्। प्रचाराभियानस्य अङ्गतया विडियो अभियानम् तथा सूक्ति-अभियानम् आचरितम्। रक्षाबन्धनस्य दिवसः संस्कृतदिवसः अस्ति अतः तस्मिन् दिने ३.८.२०२० तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा विडियो अभियानस्य अङ्गतया महानुभावैः, संस्कृतमहाविद्यालयप्राध्यापकैः, विश्वविद्यालयकर्मचारिभिः, पूर्वच्छात्रैः, संस्कृतानुरागिभिः च लघु-चलच्चित्राणि निर्मितानि आसन् तेषां सोशियल मिडिया माध्यमेन प्रचारः कृतः। आहत्य १४० जनाः तादृशानि चलच्चित्राणि प्रेषितवन्तः। तेषु गुजरातराज्यस्य माननीयः शिक्षामन्त्री, स्वामि-श्रुतिप्रकाशदासः, प्रो. चेतन त्रिवेदी, प्रो. नितिन पेथाणी इत्यादयः महानुभावाः अपि आसन्। विश्वविद्यालयस्य प्रायः सर्वेऽपि कर्मचारिणः स्वस्य, स्वकुटुम्बस्य, स्वबान्धवानां च चलच्चित्राणि प्रेषितवन्तः। एतेषां चलच्चित्राणां सम्पादनं कृत्वा तत्र विश्वविद्यालयस्य लोगो समारोप्य एतानि तेभ्यः प्रत्यर्पितानि। सर्वैः अपि सामाजिकमाध्यमैः तानि प्रसारितानि। विश्वविद्यालयस्य फेस-बुक-पृष्ठद्वारा एतेषु उपचारितानि चलच्चित्राणि प्रसारितानि। फेसबुकद्वारा अस्मद्विश्वविद्यालयद्वारा जायमानम् एतद् अभियानं वीक्ष्य अन्येऽपि नैके संस्कृतानुरागिणः प्रेरिताः। तैः अपि एतादृशाः यत्नाः अनुष्ठिताः। एतेन प्रकारेण अन्यूनं २५००० जनान् प्रति संस्कृत-दिनस्य सन्देशः गतः। विडियो-अभियानस्य संयोजनम् डॉ.दीपेशः कतिरा अकरोत्।

प्रचाराभियानस्य अङ्गतया एव संस्कृतसूक्ति-अभियानम् अभवत्। सूक्त्यभियाने फेसबुक एवं ट्वीटरमाध्यमेन संस्कृतसाहित्यस्य प्रसिद्धसूक्तिषु प्रतिदिनम् १० सूक्तीनां प्रचारः जातः। सूक्ति-अभियानस्य संचालनं श्रीगिरीशभट्टः अकरोत्।

संयुक्तांक- 25-26, जुलाई-दिसम्बर- 2020, पृष्ठ संख्या-09

2.7



आसमाहं वर्तमानसमये संस्कृतस्य का प्रासङ्गिकता इति विषयमादाय वृत्तपत्रेषु प्रासङ्गिकानां संस्कृतविषयक-विभिन्नानां सल्लेखानां प्रकाशनं जातम्। एते लेखाः कुलपति-प्राचार्य-अध्यक्षादिभिः लिखिताः आसन्। वृत्तपत्रेषु प्रकाशनाय डॉ.आशा माढक तथा कु.अपूर्वा अग्रवाल संयोजनम् अकुरुताम्। एवं विविधं प्रचारामियानम् अभवत्।

संस्कृतसप्ताहे प्रतिदिनं विविधाः स्पर्धाः अपि आयोजिताः आसन्। एतासाम् आयोजनं स्तरद्वये कृतम् आसीत् – विद्यालयस्तरे महाविद्यालयस्तरे च तद्विवरणम् एवम् अस्ति -

| दिनाङ्कः | स्पर्धा | भागग्राहिणां सङ्ख्या |
|---|---|---|
| ०१/०८/२०२० | कथाकथनस्पर्धा | १४ |
| ३१/०७/२०२० | स्तोत्रकण्ठपाठस्पर्धा | ३४ |
| ०४/०८/२०२० | एकलसंस्कृतगीतस्पर्धा | २३ |
| ०५/०८/२०२० | वक्तृत्वस्पर्धा | १८ |
| ३१ तः ०५/०८/२०२० | ऑनलाइन प्रश्नोत्तरी | २०० |




एवम् आसमाहं विविधकार्यक्रमाः श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा संस्कृतसप्ताहावसरे आचरिताः। एतस्य ऑनलाईन-संस्कृतसप्ताहोत्सवस्य समापनकार्यक्रमः ०६/०८/२०२० तमे दिनाङ्के गुरुवासरे प्रातः सार्धदशवादने समायोजितः। कार्यक्रमस्य आरम्भः मङ्गलाचरणेन कुलगीतेन च अभवत्। अस्मिन्नवसरे अनुस्नातकविभागस्य अध्यक्षः डॉ॰ ललितपटेलमहाभागः महानुभावानां परिचयं प्रदाय स्वागतम् अकरोत्। तदनु डॉ॰ दीपेशकतिरामहोदयः संस्कृतसप्ताहस्य वृत्तकथनमकरोत्।



कार्यक्रमे अस्मिन् मुख्यातिथिरूपेण श्रीगोविंदगुरुविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. प्रतापसिंहचौहाणमहोदयः अस्माभिः सद्भाग्येन सम्प्राप्तः। सन्दर्भे अस्मिन् तेन प्रसङ्गोचितम् उद्बोधनमपि कृतमासीत्। तत्र समापनकार्यक्रमे विश्वविद्यालयस्य माननीयः कुलपतिवर्यः प्रो. गोपबन्धुमिश्रमहोदयः अध्यक्षत्वेन उपस्थाय कार्यक्रमस्य सफलतायै सर्वेभ्यः आयोजकेभ्यः आशीर्वचांसि प्रादात्। अस्मिन् समापनावसरे श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा प्रकाशितस्य १. भारतीयदर्शनसिद्धान्तप्रभा, २. संस्कृतवाङ्मये नगररचना, ३. वाक्यार्थज्योतिः इति ग्रन्थत्रयस्य लोकार्पणं महानुभावानां करकमलैः जातम्। नूतनग्रन्थानां परिचयः कु॰ अपूर्वा अग्रवालमहोदयया प्रदीयत। डॉ॰ आशा माढकमहाभागया विभिन्नस्पर्धानां विजेतृणां नामोद्घोषणमकारि। अन्ते कार्यक्रमस्य समापने प्राचार्यः डॉ. नरेंद्रकुमार पण्ड्या महोदयः सर्वेषां कृते धन्यवादवचांसि प्रकटितवान्। सम्पूर्णकार्यक्रमस्य संचालनं ज्योतिषविभागस्य सहायकाचार्यः श्रीनित्यानन्दओझामहोदयः अकरोत्। कार्यक्रमस्य समापनं पूर्णतामन्त्रेण अभवत्।

ऑनलाईन वेबेक्स माध्यमेन समायोजिते समापनकार्यक्रमेऽस्मिन् श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य एवं विश्वविद्यालयसंलग्न महाविद्यालयानां प्राचार्याः, प्राध्यापकाः, कर्मचारिणः, अधिकारिणः, मुख्यातिथिमहोदयाः तथा च सर्वासु स्पर्धासु विजेतारः छात्राः उपस्थिताः आसन्। कार्यक्रमस्यास्य फेसबुक माध्यमेन लाईव प्रसारणमपि जातम्। तत्रापि बहवः जनाः कार्यक्रममिमं दृष्टवन्तः। सम्पूर्णकार्यक्रमस्य विवरणं वृत्तं च दैनिकसमाचारपत्रैः – दैनिकसमाचार, गुजरातसमाचार, फुलछाब इत्यादिभिः प्रकाशितम् आसीत्। एवम् अयम् अद्भुतः संस्कृतसप्ताहोत्सवः विश्वविद्यालयेन समायोजितः। सम्पूर्ण-सप्ताहोत्सवस्य संयोजकाः डॉ. दीपेशः कतिरा, डॉ.आशा माढकः, श्रीजिगरभट्टः, श्रीविपुलः जादवः, श्रीनित्यानन्दः ओझा, कु. अपूर्वा अग्रवालः च आसन्।




संयुक्तांक- 25-26, जुलाई-दिसम्बर- 2020, पृष्ठ संख्या-10

3.1



## दर्शनविषयकः परिसंवादः (वेबिनार)




दर्शनपरिसंवादे कुलपतिद्वयी संयोजकद्वयी च

१७-०२-२०२१ तमे दिनाङ्के श्रीसोमनाथ-संस्कृत-युनिवर्सिटी IQAC, अनुस्नातक-विभागः तथा युनिवर्सिटी- संचालित- संस्कृत- कॉलेज इत्येतासां संस्थानां संयुक्त- तत्त्वावधाने 'सिद्धान्तानामवबोधने न्यायानाम् उपयोगिता' इति दर्शनविषयकः एकदिवसीयः वेबिनार कार्यक्रमः आयोजितः। अस्य उद्घाटनकार्यक्रमे सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य माननीयः कुलपतिमहोदयः प्रो. राजाराम शुक्लमहोदयः मुख्यवक्तृत्वेन विशिष्टातिथित्वेन समुपस्थाय सदसः मार्गदर्शनमकरोत्। उद्घाटनसत्रे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रमहोदयः आध्यक्ष्यम् ऊढवान्। सत्रारम्भे डॉ शत्रुघ्नपाणिग्राही महोदयः मान्यवराणाम् अतिथीनां स्वागतवचांसि ऊचुः। दर्शनविभागस्य प्राध्यापकः संयोजकान्यतरः डॉ जानकीशरण आचार्यमहोदयः प्रास्ताविकम् अकरोत्। सत्रेऽस्मिन् कर्नाटकविश्वविद्यालयतः शोधच्छात्रः शम्भुनाथ भट्टः, राष्ट्रिय- संस्कृत- विश्वविद्यालयतः (तिरुपतिः) डॉ. यशस्वी, श्रीसोमनाथसंस्कृत-विश्वविद्यालयतः डॉ. पङ्कजकुमारः रावलः, एते त्रयः अपि स्वीयानि शोधपत्राणि पठितवन्तः। सत्रेऽस्मिन् विश्वविद्यालयस्य कुलसचिवः डॉ. दशरथजादवमहोदयः अपि उपस्थितः। अथ च विश्वविद्यालयस्य तत्तद्विभागस्य अध्यक्षाः, आचार्याः, सहाचार्याः, प्राध्यापकाः, अन्तेवासिनः छात्राः अपि उपस्थिताः आसन्। प्रथमसत्रस्यान्ते पुराणविभागस्य प्राध्यापकः डॉ पङ्कजकुमारः रावलः कार्यक्रमे उपस्थितानां सर्वेषां धन्यवादार्पणमपि अकरोत्।




प्रो. देवेन्द्रनाथ- पाण्डेयमहोदयः दर्शनवेबिनारकार्यक्रमस्य द्वितीय- सत्रस्य आध्यक्ष्यम् ऊढवान्। सत्रेऽस्मिन् मुख्यशीर्षकमुपलक्ष्य बहवः विषयाः शोधच्छात्रैः समुपस्थापिताः। सम्पूर्णे परिसंवादे आहत्य १८ शोधपत्राणि पठितानि। अस्य दर्शनवेबिनारकार्यक्रमस्य संयोजकौ डॉ. बी. उमा महेश्वरी, डॉ. जानकीशरणः आचार्यः च आस्ताम्। द्वितीयसत्रान्ते सर्वेषामपि धन्यवादज्ञापनं डॉ. जानकीशरण- आचार्यमहोदयेन कृतम्। अन्ते पूर्णतामन्त्रेण कार्यक्रमः पूर्णः अभवत्। सत्रद्वयस्य सञ्चालनं डॉ. बी. उमा महेश्वरी अकरोत्।

अंक- 27, जनवरी-मार्च- 2021, पृष्ठ संख्या-07

3.2



## ज्योतिषविषयकः वेबिनारकार्यक्रमः




श्रीसोमनाथ-संस्कृत-विश्वविद्यालय IQAC, अनुस्नातकविभागः तथा विश्वविद्यालयद्वारा संचालित-संस्कृत-महाविद्यालयः इत्येतेषां संयुक्ततत्वावधाने ३१.०३.२०२१ तमे दिनाङ्के "वास्तुशास्त्रस्यालोके कक्षविन्यासः" इति समाजोपयोगी विषयमुपादाय ज्योतिषविषयक-वेबिनार इति कार्यक्रमः सत्रद्वयेनानुष्ठितः। कार्यक्रमस्य उद्घाटनसत्रे काशी-हिन्दु-विश्वविद्यालयस्य संस्कृत-विद्याधर्म-विज्ञान-सङ्कायस्य पूर्वाध्यक्षः प्रो॰ रामचन्द्रः पाण्डेयवर्यः मुख्यवक्तृत्वेन विशिष्टातिथित्वेन समुपस्थाय वास्तुशास्त्रदृष्ट्या गृहनिर्माणस्य कृते योग्यव्यवस्थाविषये सदसः मार्गदर्शनमकरोत्। सत्रेऽस्मिन् कुलपतिः प्रो. गोपबन्धुमिश्रमहोदयः आध्यक्ष्यम् ऊढवान्। वैदिकमङ्गलाचरणेन प्रारब्धे उद्घाटनसत्रेऽस्मिन् ज्योतिषविभागस्य सहायकाचार्यः नित्यानन्द ओझा मान्यवराणां स्वागतेन सहितं कार्यक्रमस्य प्रास्ताविकं प्रास्तौत्। प्रथमसत्रेऽस्मिन् डॉ. हेमु महेश राठोड महोदया, पन्नालाल व्यासः, कृष्णकुमार भार्गवः तथा च श्रीधरव्यासः स्वीयशोधपत्राणि पठितवन्तः। सत्रान्ते नित्यानन्द ओझा सर्वेषां महानुभावानां धन्यतां प्राकटयत्। अस्य प्रथमसत्रस्य सञ्चालनं ज्योतिषविभागस्य सहायकाचार्या अपूर्वा अग्रवाल अकार्षीत्। कार्यक्रमस्यास्य फेसबुकमाध्यमेन प्रत्यक्षप्रसारणमपि अभवत्।

ज्योतिषविषयक-वेबिनार इति कार्यक्रमस्य द्वितीयसत्रस्य आध्यक्ष्यं वेदवेदाङ्गसङ्कायस्य पूर्वाध्यक्षः प्रो. देवेन्द्रनाथ पाण्डेयवर्यः ऊढवान्। सत्रेऽस्मिन् षड्भिः शोधपत्रवाचकैः विविधाः प्रासंगिकविषयाः उपस्थापिताः। सम्पूर्णे वेबिनारे आहत्य दश शोधपत्राणि पठितानि। द्वितीयसत्रस्यान्ते अपूर्वा अग्रवाल-महोदयया सर्वेषां धन्यवादः आचरितः। पूर्णतामन्त्रेण कार्यक्रमस्य समापनं जातम्। सत्रस्यास्य सञ्चालनं नित्यानन्द ओझा अकरोत्। अस्य ज्योतिष-वेबिनार इति कार्यक्रमस्य मुख्यसंयोजकत्वं नित्यानन्द ओझा ऊढवान्, संयोजकत्वञ्च सुश्री अपूर्वा अग्रवाल च ऊढवती।

अंक- 27, जनवरी-मार्च- 2021, पृष्ठ संख्या-19

3.3

## व्याकरणविषयकः ओनलाइन परिसंवादः (वेबिनार)

२७-१०-२०२० तमे दिनाङ्के श्रीसोमनाथ-संस्कृत-युनिवर्सिटी IQAC, अनुस्नातक-विभागः तथा युनिवर्सिटी-संचालित-संस्कृत-कॉलेज इत्येतासां संस्थानां संयुक्त-तत्त्वाधाने 'प्रादेशिकभाषाभिः सह संस्कृतव्याकरणस्य सम्बन्धः' इति व्याकरणविषयकः ओनलाइन परिसंवादः (वेबिनार) आयोजितः। अस्य उद्घाटनकार्यक्रमे कामेश्वरसिंहदरभङ्गा-संस्कृत-विश्वविद्यालयस्य माननीयः कुलपतिमहोदयः प्रो. शशिनाथ झा महोदयः मुख्यवक्तृत्वेन विशिष्टातिथित्वेन समुपस्थाय सदसः मार्गदर्शनमकरोत्। उद्घाटनसत्रे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रमहोदयः आध्यक्ष्यम् ऊढवान्। सत्रारम्भे प्रो. विनोद कुमार झा महोदयः मान्यवराणां स्वागतेन सहितं वेबिनारस्य प्रास्ताविकम् अकरोत्। सत्रेऽस्मिन् विश्वविद्यालयस्य व्याकरणप्राध्यापिका कुमारी विदुषी बोल्ला महोदया, दमण- प्रदेशस्य सर्वकारीयमहाविद्यालयस्य संस्कृतप्राध्यापकः डॉ. पङ्कज जाजे तथा डाकोरसंस्कृतमहाविद्यालयस्य प्राध्यापकः डॉ. रविशङ्कर राजगोर स्वीयानि शोधपत्राणि पठितवन्तः। सत्रेऽस्मिन् विश्वविद्यालयस्य अनुस्नातकविभागाध्यक्षः डॉ. ललित पटेल महोदयः धन्यवादार्पणम् अकरोत्।

प्रो.विनोद कुमार झा महोदयः वेबिनारस्य अस्य द्वितीयस्य सत्रस्य आध्यक्ष्यम् अपि ऊढवान्। द्वितीयस्य सत्रस्य सञ्चालनमकरोत् कुमारी विदुषी बोल्ला महाभागा। सम्पूर्णे वेबिनारे आहत्य १५ शोधपत्राणि पठितानि। अस्य वेबिनारस्य मुख्यसंयोजकत्वं प्रो. विनोद कुमार झा महोदयः, संयोजकत्वं च डॉ. दीपेश विनोद कतिरा ऊढवान्।





संयुक्तांक- 25-26, जुलाई-दिसम्बर- 2020, पृष्ठ संख्या-21

3.4



## साहित्यविषयकः ओनलाइन परिसंवादः (वेबिनार)




२८-१०-२०२० तमे दिनाङ्के श्रीसोमनाथ- संस्कृत- युनिवर्सिटी I Q A C, अनुस्नातक- विभागः तथा युनिवर्सिटी- संचालित- संस्कृत- कॉलेज इत्येतासां संस्थानां संयुक्त-तत्त्वाधाने साहित्यविषयकः ओनलाइन परिसंवादः (वेबिनार) समायोजितः। अस्य विषयः आसीत् "प्रादेशिकभाषाणां पद्यसाहित्ये संस्कृतसाहित्यस्य प्रभावः"। अस्य परिसंवादस्य उद्घाटनं प्रातः ११ वादने श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयकुलपतेः प्रो. गोपबन्धुमिश्रमहाभागस्य अध्यक्षतायां सम्पन्नम्। अस्मिन् उद्घाटनसत्रे आरम्भे गृहपतिः श्रीभाविनपण्ड्या मङ्गलाचरणम् अकरोत्। ततश्च प्रो. अर्चनाकुमारी दूबे महोदया सर्वेषां शाब्दिकं स्वागतं प्रास्ताविकं च अकरोत्।

अस्मिन् सत्रे त्रीणि शोधपत्राणि प्रस्तुतानि तथा अतिथिरूपेण उपस्थितेन प्रो. हरिहरहोतृमहोदयेन विशिष्टं शोधपत्रं प्रस्तुतम्। मान्यः कुलपतिवर्यः प्रो. गोपबन्धुमिश्रः अध्यक्षभाषणम् अकरोत्। अस्य सत्रस्य अन्ते डॉ. डाह्यालाल मोकरिया महोदयः धन्यवादज्ञापनम् अकरोत्। अस्य सत्रस्य सञ्चालनं श्रीजिगरः भट्टः अकरोत्।

अस्य परिसंवादस्य द्वितीयं सत्रं मध्याह्ने ०३ वादने आरब्धम्। अस्य द्वितीयसत्रस्य अध्यक्षः डॉ. ललितकुमारः पटेलः आसीत्। अस्मिन् सत्रे १३ शोधपत्राणि प्रस्तुतानि अभवन्। शोधार्थिनां शोधपत्रपठनानन्तरम् अध्यक्षः डॉ. ललितकुमारः पटेलः विशिष्टं शोधपत्रं प्रस्तुतवान् आध्यक्षीयभाषणं च कृतवान्। अस्य सत्रस्य सञ्चालनम् अन्ते च धन्यवादज्ञापनं श्रीजिगरः भट्टः अकरोत्।

अस्य सम्पूर्णकार्यक्रमस्य मार्गदर्शनम् अनुस्नातकविभागाध्यक्षेण डॉ. ललितकुमार-पटेल-महोदयेन तथा प्राचार्येण डॉ. नरेन्द्रकुमार-पण्ड्या-महोदयेन अक्रियत। कार्यक्रमस्य मुख्यसंयोजकत्वेन प्रो. अर्चनाकुमारी दूबे महोदया कार्यम् अकरोत् तथा सहसंयोजकत्वेन डॉ. डाह्यालाल मोकरिया महोदयः कार्यम् अकरोत्।

संयुक्तांक- 25-26, जुलाई-दिसम्बर- 2020, पृष्ठ संख्या-22

3.5



## पुराण-धर्मशास्त्रयोः राष्ट्रियः परिसंवादः (वेबिनार)




पुराणविषयक-परिसंवादस्य उद्घाटनकार्यक्रमः



पुराणधर्मशास्त्रविषयके परिसंवादे उपस्थिताः महानुभावाः

श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा २३/१२/ २०२० तमे दिनाङ्के बुधवासरे एकदिवसात्मकः "पुराणधर्मशास्त्रयोः आदर्शजीवन स्वरूपम्" इति विषयकः परिसंवादः (वेबिनार) समायोजितः। अत्र एकत्रिंशत् शोधार्थिनः आभारतात् संलग्नाः जाताः आसन्। अस्मिन् परिसंवादे उद्घाटनसत्रे मुख्यातिथिरूपेण झारखण्डस्य कोल्हान-विश्वविद्यालयस्य कुलपतिचरः प्रो. गङ्गाधर- पण्डा महोदयः आसीत्। प्रो. गङ्गाधरपण्डा महोदयेन रामायणमहाभारतादारभ्य अष्टादशपुराणोप- पुराणानां धर्मशास्त्राणां स्मृतीनां ससन्दर्भप्रसङ्गं सारस्वतभाषणं प्रदत्तम्।

अस्मिन् कार्यक्रमे अध्यक्षरूपेण माननीयः कुलपतिः प्रो. गोपबन्धु-मिश्र-महोदयः उपस्थाय विशिष्टं मार्गदर्शनम् उद्बोधनं च अकरोत्। ततः अस्य परिसंवादस्य प्रथमसत्रम् आरब्धम्। अस्य सत्रस्य अध्यक्षपदे ब्रह्मर्षि-संस्कृत-महाविद्यालयस्य प्रधानाचार्यः आधुनिककविश्च डो. अमृतलाल-भोगायता-महोदयः आसीत्। द्वितीयसत्रे विश्वविद्यालयेन सञ्चालितस्य महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमार-पण्ड्या-महोदयः अध्यक्षत्वेन उपस्थाय शोधपत्रप्रस्तोतृणां मार्गदर्शनम् अकरोत्। अस्य कार्यक्रमस्य संयोजनं डॉ. पंकजकुमारः रावलः डॉ. आशा माढकः च अकुरुताम्। सम्पूर्णोऽयं कार्यक्रमः वेबेक्स माध्यमेन आयोजितः आसीत्। कार्यक्रमान्ते डॉ. आशा माढक सर्वेषाम् अतिथीनां महानुभावानां शोधपत्रप्रस्तोतृणां च धन्यवादज्ञापनम् अकरोत्।

संयुक्तांक- 25-26, जुलाई-दिसम्बर- 2020, पृष्ठ संख्या-26

3.6



वेदविषयके परिसंवादे अध्यक्षपदे भाषमाणः प्रो. गोपबन्धुमिश्रवर्यः



वेदविषयके परिसंवादे भाषमाणः श्रीराममूर्तिः चतुर्वेदी महोदयः



वेदविषयके परिसंवादे संचालकः डॉ. शत्रुघ्नः पाणिग्राही महोदयः

## वेदविषयकः राष्ट्रियः परिसंवादः (वेबिनार)

श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा पूज्यानां कुलपतिवर्याणामाध्यक्षे प्रेरणया मार्गदर्शनेन च "वेदाध्ययनम् आधुनिकसमाजश्च" इति विषयमाश्रित्य एकः वेदविषयकः परिसंवादः(वेबिनार) २४/१२/२०२ तमे दिनाङ्के गुरुवासरे समायोजितः। कार्यक्रमेऽस्मिन् २७ शोधपत्राणि शोधकृद्भिः प्रस्तुतानि आसन्। अस्मिन् परिसंवादे उद्घाटनसत्रे मुख्यातिथिरूपेण महात्मा गान्धी काशीविद्यापीठस्य संस्कृतविभागस्य पूर्वतनविभागाध्यक्षः प्रो. राममूर्ति-चतुर्वेदिमहोदयः सम्प्राप्तः।

अस्याः संगोष्ठ्याः प्रारम्भः पूर्वाह्ले एकादशवादने काण्वशाखीयवैदिकमङ्गलाचरणेन प्रारब्धः। अस्य सत्रस्य सत्राध्यक्षपदं विभूषितवान् अस्माकं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धु-मिश्र-महोदयः। सञ्चालकः डॉ. शत्रुघ्नः पाणिग्राही महोदयः आसीत्। तत्र मुख्यातिथिमहोदयस्य वक्तव्यसारः आसीत् यत् वेदस्य समाजसम्बद्धाः सन्देशाः आधुनिकसमाजसमृध्यै लोके अस्माभिर्वैदिकैः प्रसारणीयाः इति। ततश्च अध्यक्षपदे आसीनस्य मान्यस्य कुलपतिवर्यस्य वक्तव्यसारः अयमासीत् यत् वेदस्तु सम्पूर्णविश्वसमाजस्य विषये मार्गदर्शनं करोति। तस्मात् यानि नैतिकमूल्यानि, कृषि-वाणिज्यादिसम्बद्धानि वैज्ञानिकतत्त्वानि वैदिकमन्त्रेषु ब्राह्मण-आरण्यक-उपनिषत्सु च निहितानि सन्ति, तानि तत्त्वानि आधुनिकसमाजे व्यवहर्तव्यानि। अस्मिन् सत्रे धन्यवादविज्ञापनं व्याकरणविभागाध्यक्षः प्रो. विनोदकुमार-झा महोदयः अकरोत्। अस्य कार्यक्रमस्य द्वितीयं सत्रम् अपराह्ले द्विवादने प्रो. देवेन्द्रनाथ-पाण्डेय-महोदयस्य आध्यक्षत्वे प्रारब्धम्। अस्मिन् सत्रे सत्रसञ्चालकः आसीत् श्रीविपुलकुमार-जादवमहोदयः। सत्रमिदं ५.०० वादनं यावत् प्राचलत्। एवम् अयं कार्यक्रमः सफलतया विश्वविद्यालयेन समायोजितः।

4.1

## माइक्रोसोफ्ट टीम्स् तन्त्रांशस्य प्रशिक्षणकार्यक्रमः

श्रीसोमनाथसंस्कृतविश्वविद्यालये कार्यरतानाम् अध्यापकानां कृते २५.०८.२०२० दिनाङ्के अपराह्ले ०३.०० वादनात् ६.०० वादनं यावत् माइक्रोसोफ्ट टीम्स् (Microsoft Teams) इति तन्त्रांशस्य प्रशिक्षणाय कश्चन कार्यक्रमः समायोजितः। अस्मिन् कार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य सर्वेऽपि प्राध्यापकाः भागम् अगृह्णन्। कोविड्-१९ सङ्क्रमणकारणेन छात्राणां साक्षादुपस्थित्यभावात् तेषाम् अध्ययनम् अन्तर्जालमाध्यमेन भवतु एतदर्थम् एषः प्रशिक्षणः कार्यक्रमः समायोजितः आसीत्।

अस्य माइक्रोसोफ्ट टीम्स् तन्त्रांशस्य प्रशिक्षणकार्यक्रमस्य आध्यक्षं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिवर्याः प्रो. गोपबन्धुमिश्रवर्याः अकुर्वन्। अस्य कार्यक्रमस्य आरम्भः मङ्गलाचरणेन जातः। कार्यक्रमस्य संयोजकेन दर्शनविभागस्य प्राध्यापकेन डॉ. जानकीशरण आचार्येण मञ्चस्थमहानुभावानां स्वागतं विधायं कार्यक्रमस्य प्रास्ताविकं प्रास्तावि। तदनु अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमार पटेलः अपि प्रसङ्गोचितं वक्तव्यं प्रादात्। अस्मिन्नवसरे वेरावलस्थ-महिला-महाविद्यालयस्य सहाचार्येण डॉ. सञ्जय भूत वर्येण एतस्य माइक्रोसोफ्ट टीम्स् इति तन्त्रांशस्य विशिष्टं प्रशिक्षणम् अपि उपस्थितेभ्यः सर्वेभ्यः प्रदत्तम्।

अस्मिन् कार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिवर्याः प्रो. गोपबन्धुमिश्रवर्याः अध्यक्षीयम् उद्बोधनं कृतवन्तः। तैः उक्तं यत् कोविड-१९ सङ्क्रमणकारणात् छात्राणां प्रत्यक्षरीत्या तु पाठनं कर्तुं न शक्यते, तथापि अस्माकं विश्वविद्यालयेन जूनमासादारभ्य एव जूम, वेबेक्स इत्यादि तन्त्रांशमाध्यमेन छात्राणाम् कृते अध्यापनम् आरब्धम् आसीत्। सम्प्रति सर्वकारस्य आदेशानुसारं नूतनेन तन्त्रांशमाध्यमेन अपि अध्ययनं सततं भविष्यति, अतः एतदर्थम् अस्माकम् अध्यापकाः सिद्धाः सन्ति। एतस्य तन्त्रांशस्य प्रशिक्षणेन इतोऽपि अध्यापनपद्धतौ नैपुण्यं सम्पाद्यते। कार्यक्रमान्ते संस्कृतमहाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमार पण्ड्या धन्यवादज्ञापनम् अकरोत्। अस्य कार्यक्रमस्य संयोजनं च डॉ. जानकीशरण आचार्यः अकार्षीत्।



5.1



जुलाई-डिसेम्बर २०२० 25 संयुक्ताङ्कः-२५-२६

श्रीसोमनाथ-संस्कृत-युनिवर्सिटी
इत्यस्य IQAC द्वारा आयोजितः
शास्त्रपरिचयप्रकल्पः
विश्वविद्यालयस्य प्राध्यापकैः निर्मितानां ३६ विडिओ-पाठानां लोकार्पणम्
लोकार्पण-कार्यक्रमः
Facebook Live shorturl.at/gvwy8
११ डिसेम्बर, २०२० शुक्रवासरे सायं ५.०० वादने
मुख्यातिथिः
सारस्वतातिथिः
अध्यक्षः
प्रो. प्रतापसिंह चौहाण
प्रो. अनुला मौर्य
प्रो. गोपबन्धु मिश्र
Subscribe to our Youtube Channel - 'Shree Somnath Sanskrit University'

# शास्त्रपरिचयप्रकल्पान्तर्गतं सज्जानां ३६ विडिओ-पाठानां लोकार्पणम्

११.१२.२०२०तमे दिनाङ्के सायं ५:०० वादने शास्त्रपरिचयप्रकल्पान्तर्गतं सज्जानां ३६ विडिओ-पाठानां लोकार्पणकार्यक्रमः ऑनलाईन-माध्यमेन सम्पन्नः। कार्यक्रमे अस्मिन् श्रीसोमनाथसंस्कृतयुनिवर्सिट्याः माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रमहोदयः अध्यक्षत्वेन उपस्थाय अस्य शास्त्रपरिचयप्रकल्पस्य प्रासङ्गिकतां प्रत्यपादयत्। कार्यक्रमे अस्मिन् मुख्यातिथित्वेन उपस्थितः गोधरास्थायाः श्रीगोविन्दगुरुयुनिवर्सिट्याः कुलपतिः प्रो. प्रतापसिंह चौहाण महोदयः संस्कृतवाङ्मयस्य महत्त्वं बोधितवान्।

जयपुरस्थस्यजगद्गुरुरामानन्दाचार्यसंस्कृतविश्वविद्यालय- स्य कुलपतिमहाभागा प्रो. अनुला मौर्य महोदया अस्मिन् कार्यक्रमे सारस्वतातिथित्वेन उपस्थिता आसीत्। सा एतं प्रकल्पं बहुशः श्लाघितवती। महानुभावानां परिचयं कारितवान् श्रीसोमनाथसंस्कृतयुनिवर्सिट्याः अनुस्नातक- विभागाध्यक्षः डॉ. ललितकुमार पटेल महोदयः। सर्वैरपि महानुभावैः सम्भूय एतेषां विडिओ-पाठानां लोकार्पणं कृतम्। कार्यक्रमान्ते विश्वविद्यालयसञ्चालितमहाविद्यालय- स्य प्राचार्यः प्रि. नरेन्द्रकुमार पण्ड्या महोदयः। अस्य कार्यक्रमस्य सूत्रसञ्चालनं साहित्यविभागस्य सहायकाचार्येण श्रीजिगरभट्टमहोदयेन कृतम्।